Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# उत्तररामचरिते रसविचारः

**डॉ. अञ्जली कबाटः**
अतिथि-अध्यापिका, संस्कृतविभागः
राजेन्द्रविश्वविद्यालयः, बलाङ्गिरम्
ओडिशा

**शोधालेखसारः –**

भवभूतिविरचिते उररामचरितनाटके नैके रसाः विद्यन्ते। कविः अस्मिन्नाटके प्रायेण सर्वविधानपि रसान् प्रयुज्य सचेतसः चेतांसि प्रासादयत्। ते च रसाः यथा – करुणः, करुणविप्रलम्भश्रृङ्गारः, सम्भोगश्रृङ्गारः इत्यादयः कविना स्वकीयनाटके सुचित्रिताः। तत्र प्रधानरसः करुण इति विदितप्रायमेव। कारुण्यं भवभूतिरेव तनुते इतीयं सूक्तिः समेषां कर्णगोचरा एव। अतः करुणरसपरिपाके भवभूतिः अन्यान् कवीश्वरान्नतिशेते। परन्तु तत्र केचन अस्य नाटकस्य अङ्गिरसत्वेन करुणविप्रलम्भश्रृङ्गारम् अभिप्रयन्ति। तर्हि नाटकस्य प्रधानरसः कः? करुण उत करुणविप्रलम्भः? इत्येवं पक्षद्वयमागतम्। उभावपि पक्षौ सविचारौ वर्तेते। एवञ्च नाटके विद्यमानाः वीररौद्रबीभत्सादयोऽङ्गरसाः अपि नाटकमिदं सहृदयपानयोग्यं कारयन्ति।

**प्रमुखशब्दाः –** रसः, उत्तररामचरिते करुणरसः, करुणविप्रलम्भश्रृङ्गाररसः, करुण-करुणविप्रलम्भयोः मतभेदः, सम्भोगश्रृङ्गाररसः, वीररसः, रौद्ररसः, बीभत्सरसः, भयानकरसः, हास्यरसः, अद्भुतरसः।

**शोधालेखः –**

संस्कृतनाट्यसाहित्ये भवभूतिविरचितम् उत्तररामचरितं विशिष्टं स्थानं भजते। इयमेव भवभूतेः अन्तिमा तथा उत्कृष्टा कृतिः। अतः विक्रमार्केण उच्यते - 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति। अस्यामेव कवेः व्यक्तित्वं प्रतिबिम्बितं भवति। अस्मिन् नाटके सप्ताङ्काः वर्तन्ते। रामायणस्य उत्तरकाण्डमवलम्ब्य नाटकमिदमुपनिबद्धम्। उत्तररामचरितस्य रसः विचार्यश्चेद् आदौ रसः कः इति ज्ञातव्यः।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**"रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति।"**[1] - इति तैत्तिरीयोपनिषद्वाक्यं वदति यत् स रसः परमात्मस्वरूपः। एवञ्च तमेव रसं लब्ध्वा कश्चिज्जनः आनन्दमनुभवति इति वैदान्तिकम्। साहित्ये कोऽयं रस इत्युच्यते साहित्यदर्पणे -

**विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।**
**रसतामेति रत्यादिः स्थायीभावः सचेतसाम्॥** (3.1)

साहित्येऽपि काव्यान्तर्गतरस एव प्रधानः। रसं विना काव्यं काव्यं न हि, अतः रसो भवति काव्यस्यात्मा। काव्यस्य रसमास्वाद्य सहृदयाः पाठकाः अलौकिकिकल्पम् आनन्दं प्राप्नुवन्ति, स एव रसानन्द इत्युच्यते। विश्वनाथेन साहित्यदर्पणे रसस्वरूपं प्रोक्तं –

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥** (३.२)
**लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥** (३.३)

कथं रसोत्पत्तिर्भवति तद्विषये भरतमुनिना सूत्रं प्रणीतं यत् **"विभावानुभाव-व्यभिचारिसंयोगाद्रसनिष्पत्तिः"**[2] इति। रसस्य अष्टौ प्रकाराः सन्ति। केषाञ्चन नये नव दश वा सन्ति।

कस्मिन्नपि काव्ये प्रधानरसः अङ्गिरसो वा एको भवति, तस्य अङ्गरसाः अपि भवन्ति। एवमेव उत्तररामचरिते अङ्गिरसः अङ्गरसाश्च विद्यन्ते। उत्तररामचरितस्य प्रधानः रसः कः? करुणः उत करुणविप्रलम्भश्रृङ्गारः? इत्यत्र विदुषां मतभेदः दृश्यते। केचित् करुणरसं प्रधानरसत्वेन अङ्गीकुर्वन्ति, केचिच्च करुणविप्रलम्भश्रृङ्गाररसम् अभ्युपगच्छन्ति। एवमत्र पक्षद्वयं समागच्छति। पक्षद्वयेऽपि विचाराः, मतानि, युक्तयः सन्ति। अधः पक्षद्वयमपि व्याख्यायते एवञ्च तत्र स्थिताः विचाराः स्पष्टीक्रियन्ते –

**करुणरसपक्षः –**

अस्मिन् पक्षे यैः उत्तररामचरितनाटकस्य प्रधानरसः करुणः इति अङ्गीक्रियते तेषां युक्तिः पर्यालोच्यते। तद्यथा - अस्य नाटकस्य सप्तमेऽङ्के सूत्रधारः नाटकमिदं करुणाद्भूतरसयुतमिति आख्याति। तदुक्तं - **"करुणाद्भुतरसञ्च किञ्चिदुपनिबद्धम्"**[3]। करुणरसम् अङ्गीकुर्वाणाः वदन्ति यत् इयमुक्तिः

[1] तैत्तिरीयोपनिषद्, २.७.१
[2] नाट्यशास्त्रम्, षष्ठाध्यायः
[3] उत्तररामचरितम्, डॉ. रमाकान्त त्रिपाठी, पृ - ४०४

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

सम्पूर्णनाटके सङ्गच्छते। तृतीयाङ्कस्य प्रथमे मुरला प्राह –

**अनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथः।**

**पुटपाकप्रतीकाशो रामस्य करुणो रसः॥** (३.१)

रामस्य करुणरसः अत्यन्तगूढः, अतः बहिः तत्प्रकाशो नास्ति परन्तु अन्तः स व्यथितः अस्ति। तृतीयाङ्कस्य अन्तिमे कविः 'तमसा' - इति नाटकपात्रमुखेन विवक्षति –

**एको रसः करुण एव निमित्तभेदाद्**

**भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।**

**आवर्तबुद्बुदतरङ्गमयान्विकारान्**

**अम्भो यथा सलिलमेव तु तत्समग्रम्॥** (३.४७)

यथा सलिलमेकमावर्तबुद्बुदतरङ्गादिभेदात् विविधं प्रतिभाति, तथैव करुण एव रसो वैविध्यं भजते। स एव करुणप्रधाने विप्रलम्भश्रृङ्गारेऽपि परिणमति। तस्य तीव्रताभिव्यक्तिः ललितासु कलासु भवति। एक एव करुणरसः निमित्तभेदात् भिन्नरूपेण विवर्तितो भवति। एतेन अभिव्यज्यते यत् करुणरस एव प्रधानः। महावीरचरिते भवभूतिना स्वयमेव भणितं यत् - **'यत्र वीरः स्थितो रसः'**[4] इति। किञ्च भरतः नाटकस्वरूपं वर्णयन्नाह –

**नृपतीनां यच्चरितं नानारसभावचेष्टितं बहुधा।**

**सुखदुःखोत्पत्तिकृतं भवति हि तन्नाटकं नाम॥** (१८.१२)

अर्थात् नाटके बहवः रसाः भावाश्च भवितुमर्हन्ति। नाटकरसविषये साहित्यदर्पणे विश्वनाथः विवक्षति यत् –

**एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा।**

**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः॥** (६.१०)

एवमालङ्कारिकाणां मतवैविध्यं दर्शयित्वा करुणरसवादिनः विवक्षन्ति यत् नाटके नानारसाः भवन्ति किन्तु तेषु कश्चिदेक एव प्राधान्यं वहति। अतः करुणरसस्य प्रधानत्वस्वीकारे नास्ति कापि विप्रतिपत्तिः। स्वमतमितोऽपि प्रबलीकर्तुम् इमे आनन्दवर्धनाभिमतम् उद्धरन्ति –

**प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने।**

**एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता॥**[5]

---

[4] महावीरचरितम्, १.३

[5] ध्वन्यालोकः, ३.२१

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

अर्थात्, नाटकादिप्रबन्धेषु नानारसाः भवन्ति चेदपि नाटकस्य उत्कृष्टता वर्धनीयाश्चेत् कश्चिदेकोऽङ्गी रसः चेतव्यः। इष्टविनाशेन अनिष्टप्राप्त्या च अस्माकं चित्ते शोकोत्पत्तिर्भवति। शोकः करुणरसस्य स्थायीभावः। करुणरसस्य अङ्गित्ववादिभिः उत्तररामचरिते करुणरसस्य विभावाद्यन्वयः दिदृक्षितः। नाटकस्य प्रथमाङ्के सीतापरित्यागसिद्धान्तग्रहणादारभ्य सप्तमाङ्के गर्भनाटकसमाप्तिपर्यन्तं निरवच्छिन्नधारया शोकरूपस्थायीभाव एव अन्ववर्तत। अत्र रामे विद्यमानशोकस्य आलम्बनविभावः सीता एवञ्च सीतायां रामः। उत्तररामचरिते प्रथमेऽङ्के चित्रदर्शने स्मृतिपथं समागच्छतामतीतानां वृत्तान्तानां स्मरणेन करुणरसस्य प्रवाहो दृश्यते। तद्यथा –

**जीवत्सु तातपादेषु नूतने दारसङ्ग्रहे।**
**मातृभिश्चिन्त्यमानानां ते हि नो दिवसाः गताः॥** (१.१९)

स्वबाल्यकालस्य पितृमातृस्नेहसिक्तान् दिवसान् स्मारं स्मारं कस्य जनस्य नावर्जयति चेतः। एवमस्मिन्नेवाङ्के सीताहरणे सति जनस्थाने मर्यादापुरुषोत्तमस्यापि रामस्य दशा कीदृशी आसीत्, सा कारुण्यपूर्णा स्थितिः चित्रदर्शने लक्ष्मणेनेत्थं वर्ण्यते –

**अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना**
**तथा वृत्तं पापैर्व्यथयति तथा क्षालितमपि।**
**जनस्थाने शून्ये विकलकरणैरार्यचरितैः**
**अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्॥** (१.२८)

सीतायाः वियोगे रामस्य यादृशी करुणस्थितिः आसीत्, यत् ग्रावापि रोदिति स्म वज्रस्यापि हृदयं विदीर्यते स्म। द्वितीये तृतीये च अङ्के रामस्य शोकमात्रा इतोऽपि वर्धिता। उत्तररामचरिते सीतायाः परित्यागादनन्तरं तृतीयाङ्के तु करुणरसः परां काष्ठां गत इति प्रतीयते। स्वयं राम एव स्वकीयां शोकव्यथापूर्णां दशामित्थं प्रकटयति –

**दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते**
**वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।**
**ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्**
**प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्॥** (३.३१)

कियत् सुन्दरं सजीवञ्च चित्रणमस्ति। हृदयं प्रस्फुटति, किन्तु द्विधा न भवति, कायः विकलयति, किन्तु प्राणान् न त्यजति, अन्तर्वेदना ज्वलयति किन्तु भस्मसान्न करोति, विधिः मर्मस्थलेषु प्रहरति, किन्तु जीवनसूत्रं न छिनत्ति। ततः रामः सीतां प्रति ब्रूते यत् –

**हा हा देवि ! स्फुटति हृदयं ध्वंसते देहबन्धः**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**शून्यं मन्ये जगदविरतज्वालमन्तज्वलामि ।**
**सीदन्नन्धे तमसि विधुरो मज्जतीवाऽन्तरात्मा**
**विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥** (३.३८)

श्लोकेऽस्मिन् रामस्य धीरतायाः बन्धस्त्रुटितः, सहजधीरतां विमुच्य सोऽपि क्रोशति। रामः विशश्वास यत् सीता न जीविता। सीतापि विश्वसितवती यत् रामेण सह तस्याः मेलनं पुनः कदापि न सम्भवतीति। अतः तया उक्तं - **"जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनस्य"**[6]। इतोऽप्यनया उक्तं - **"मम पुनर्मन्दभाग्यया दृश्यमानमपि सर्वमेवैतन्नास्ति"**[7]। एवमुभौ अपि उभयोः विरहावस्थां कल्पयमानौ शोकं प्राप्नुतः। एवम्प्रकारेण तृतीयेऽङ्के करुणरसः चरमरूपेण अभिव्यक्तः। तथा अङ्कान्तरेऽपि करुणरसधारा प्रवाहिता। अत्र केवलं दिङ्मात्रं दर्शितम्।

## करुणविप्रलम्भश्रृङ्गारपक्षः –

अस्मिन् पक्षे उत्तररामचरिते अङ्गिरसत्वेन करुणविप्रलम्भश्रृङ्गारसम् अङ्गीकुर्वतां मतानि, युक्तयः, विचाराः उपस्थाप्यन्ते। तत्र **'एको रसः करुण एव निमित्तभेदाद्'**[8] इत्यस्मिन् श्लोके करुणरसवादिभिः यदुक्तं कविः नाटकीयपात्रमाध्यमेन विवक्षति यत् करुणः एव प्रधानरसः इति चेन्न, तत्र परिस्थितिरेव करुणामयी आसीत्, अतः तदुक्तं न तु सम्पूर्णनाटके तदनुवर्तनीयम् एवञ्च नाटकस्य मूलरससरूपेण गणनीयम्। यदि तुष्यतुदुर्जनन्यायेन श्लोकमिमं नाटकस्य मूलरसाभिव्यञ्जकरूपेण अथवा करुणरसाभिव्यञ्जकरूपेण स्वीकुर्मः तर्हि तथापि तन्नोपपद्यते। यतो हि अलङ्कारशास्त्रे शोकः करुणरसस्य स्थायीभावरूपेण स्वीकृतोऽस्ति। शोकः तदैव भवति यदा इष्टस्य विनाशो भवेत् न तु वियोगः। प्रकृते तु वियोगो दृश्यते अतः तत्रापि यदि करुणरसः स्वीक्रियते तर्हि करुणविप्रलम्भस्य क्षेत्रं सङ्कुचितं भवति। विश्वनाथेन साहित्यदर्पणे अभाणि यत् -

**शोकस्थायितया भिन्नो विप्रलम्भादयं रसः।**
**विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः॥** (३.२२१)

करुणविप्रलम्भे रतिः स्थायीभावः। अत्र प्रियजनेन सह पुनर्मिलनं भवति। करुणरसे शोकः स्थायीभावः। अत्र पुनर्मिलनं न भवति। यद्यपि करुण-करुणविप्रलम्भयोः साम्यं वर्तते तथापि सूक्ष्मभेदः तु अस्त्येव। करुणे इष्टप्राप्तिः कदापि न सम्भवति परन्तु विप्रलम्भे सम्भवति। भोजराजः तस्य

---

[6] उत्तररामचरितम्, डॉ. रमाकान्त त्रिपाठी, पृ - १५९
[7] उत्तररामचरितम्, डॉ. रमाकान्त त्रिपाठी, पृ - १७९
[8] उत्तररामचरितम्, ३.४७

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

शृङ्गारप्रकाशे करुणविप्रलम्भस्य शोकस्य (शोकस्थायीभावस्य करुणस्य) च हेतुफलविषयस्वरूपतः भेदं प्रदर्शयन्नाह - **"रत्येकहेतुः करुणः, प्रतिदयाद्यनेकहेतुः शोकः, पुनःसङ्गमफलः करुणः, अपुनःसङ्गमफलः शोकः, स्त्रीपुंसविषयः करुणः, अस्त्रीपुंसविषयः शोकः, सप्रत्याशारूपः करुणः, निष्प्रत्याशारूपः शोकः"** ।[९]

करुणविप्रलम्भस्य एक एव हेतुः रतिः परन्तु करुणस्य प्रीतिदयाद्यनेके हेतवः सन्ति। करुणविप्रलम्भस्य फलं पुनःसङ्गमः परन्तु करुणस्य फलं पुनःसङ्गमाभावः। करुणविप्रलम्भस्य विषयः केवलं स्त्रीपुरुषः परन्तु करुणस्य विषये तथा कापि सीमा नास्ति, अत्र विषयः असीमः अनियन्त्रितः। करुणविप्रलम्भस्य स्वरूपे मिलनस्य आशा तिष्ठति परन्तु करुणे सा नैव तिष्ठति। एवमस्ति अनयोर्भेदः। वस्तुतः उभयोः सादृश्यम् बह्वस्ति अतः अनयोः सुस्पष्टभेदम् अधिगन्तुं नैकेषां विभ्रमो जायते।

उत्तररामचरितनाटकस्य विषयवस्तुनः विश्लेषणं क्रियते चेत् स्पष्टमिव ज्ञायते यत् नाटककारः रामायणस्य करुणरसमयीं वियोगान्तकथां मिलनान्तिकां कर्तुं प्रवृत्तः आसीत्। प्रस्तावनायां स एवाभिप्रायः सूक्ष्मया रीत्याभिव्यक्तः। रामः निर्वासितां सीतां मृतां मन्यमानः अपि तृतीयाङ्के पूर्वनिश्चिते निर्णये सन्देहम् अनुभवति - हृदयस्य गुह्यप्रदेशे सीतासम्बन्धिनी काचिदाशा नूनम् उपजायते इति। षष्ठाङ्के लवकुशयोर्दर्शनानन्तरं सा सूक्ष्माशा इतोऽपि जागरिता भवति। दण्डकारण्यं, जनस्थानं, पञ्चवटी इति एतानि सीतास्मृतिसंवलितानि स्थानानि तस्याः पुराचरणवचनस्मरणं च रामस्यान्तःस्थितं रतिभावम् उद्दीपयन्ति। सीताया अपि नूनं पुनर्मिलनाभिलाषः सर्वथा निगूढो नासीत्। तृतीयाङ्के एकवारं सीता तमसां प्राह यत् - सन्तानस्मरणेन स्तनाभ्यां दुग्धः स्रवति। अहं तु स्वसन्तानयोः पितुः समीपे क्षणमपि आत्मानं संसारिणीमिति मन्ये। अस्याङ्कस्य समाप्तौ तमसया वासन्त्या च उच्चारिता वाणी उभयोः चित्ते भाविमिलनस्याशां जागरितवती। तमसा किञ्च वासन्ती सीतां रामञ्चोपलक्ष्य वदतः - पृथिवी, भागीरथी, वाल्मीकिः, अरुन्धती वशिष्ठश्च युवां पुनर्मिलनस्य कल्याणं प्रददतु। एवमत्र स्पष्टं प्राधान्येन करुणविप्रलम्भः रसः अभिव्यज्यते यदि अत्र करुणमात्रं स्वीक्रियते तर्हि तयोः मेलनं न शक्येत। करुणरसम् अङ्गिरसरूपेण प्रदर्शयता यत् यत् विभावादियोजनं दर्शितं तद् वस्तुतः विप्रलम्भशृङ्गारस्यैव विभावादियोजनम्। नाटककारेण भवभूतिना स्वयमपीष्यते यत् तन्नाटकं वियोगान्तं करुणरसमयं वा न स्यात्। तथा च साहित्यदर्पणे भणितं विश्वनाथेन-

**यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।**

[९] Bhoja's Srngara Prakasa, V. Raghavan, P - 60

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**विमनायते यदैकस्ततो भवेत् करुणविप्रलम्भाख्यः॥** (३.२०९)

यदि द्वयोर्मध्ये एकः लोकान्तरं गतः एवञ्च इतरेण दुःखमनुभूयमानमस्ति एवञ्च तेषां सम्मेलनं यदि अस्मिन्नेव जन्मनि अग्रिमकाले च जायेत तर्हि सः करुणविप्रलम्भश्रृङ्गारः। इदानीं प्राकृतमनुस्त्रियते चेदिदं लक्षणं प्रकृतस्थलेऽपि सङ्गच्छते। अतः करुणविप्रलम्भ एव अङ्गिरसः। यद्यत्र अन्यवादिभिः आक्षिप्यते यत् - इदं लक्षणं तु तदा एव सङ्घटते यदा द्वयोरेको मृतो भवति परन्तु प्रकृते नाटके कोऽपि मृतो नास्ति। तर्हि विप्रलम्भो न भवति इति चेत् तत्र वयं लक्षणान्तरं ब्रूमः, तच्च रुद्रटस्य काव्यालङ्कारे उपनिबद्धम् –

**करुणः स विप्रलम्भो यत्रान्यतरो म्रियेत नायकयोः।**
**यदि वा मृतकल्पः स्यात्तत्रान्यस्तद्गतं प्रलपेत्॥** (१४.३४)

अत्रोच्यते यत् यद्यपि कोऽपि न मृतः तथापि मरणं सञ्जातम् इति कल्पयित्वा अन्यतरेण अनुभूयमाने दुःखेऽपि स एव रसो वक्तव्यः। एवमत्र रामस्य पार्श्वे सीता मृता नास्ति परन्तु मृतसदृशा तथैव सीतापक्षेऽपि। एवं कृत्वात्र लक्षणं सङ्घटते। अतः करुणविप्रलम्भश्रृङ्गार एव प्रधानरसः। **"एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा"**[10] - इत्यत्र विश्वनाथेन यदुक्तं श्रृङ्गारवीरयोः अङ्गी रसो भवति तर्हि तत्र करुणस्य पक्ष एव अपगतः। अतः उत्तररामचरितनाटकस्य प्रधानरसः करुणविप्रलम्भश्रृङ्गार इत्ययं पक्षोऽप्युपस्थापितः।

एतावत्पर्यन्तं नाटके अङ्गिरसविषये विचारः समुपजायमानः आसीद्, अधुना नाटकस्य अङ्गरसाः विचारिष्यमाणाः भविष्यन्ति। भवभूतिना उत्तररामचरिते प्रायेण सर्वेऽपि रसाः अङ्गरसत्वेनोपनिबद्धाः। तेषां दिङ्मात्रमुपस्थाप्यते।

## सम्भोगश्रृङ्गारः –

उत्तररामचरितनाटके प्रथमाङ्के दुर्मुखेश्यः सीतायाः अपवादश्रवणात् पूर्वपर्यन्तं यत् सम्भोगश्रृङ्गारस्य समुज्ज्वलवर्णनं दृश्यते, तदस्मान्नतिशयम् आनन्दयति। तद्यथा –

**किमपि किमपि मन्दं मन्दमासत्तियोगाद्**
**अविरलितकपोलं जल्पतोरक्रमेण।**
**अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः**
**अविदितगतयामा रात्रिरेव व्यरंसीत्॥** (१.२७)

---

[10] साहित्यदर्पणः, ६.१०

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

रामः सीतां प्रति वक्ति - अत्रावाम् अविरलरतया मणीयकथाः उभौ अपि कुर्वन्तौ आस्व। तासु कथासु काचिदपि सङ्गतिः नासीत्। कर्णे मन्दस्वरे संलपन्तौ आवयोः कपोलौ परस्परं संलग्नौ भवतः। परस्परस्यैकबाहुना अन्यः बद्धो भवति स्म, तस्मिन् बद्धे किञ्चिदपि शैथिल्यम् नासीत्। एवं रूपेणास्माकं रात्रिः प्रभातं याता। प्रहराः कथं व्यतीताः भवन्ति इति न ज्ञायते स्म। अत्र रामाश्रितरतेः आलम्बनं सीता, सीताश्रितरतेः आलम्बनं रामः। निर्जनगोदावरीतटस्य रमणीयं पर्यावरणम्, रजन्याः निःस्तब्धता चेति उद्दीपनविभावौ। परस्परं गाढालिङ्गनम्, अनिर्गलप्रेमिकालापः रोमाञ्चादयोऽपि अत्र वर्णितानुभावाः।

## वीरः –

नाटकस्य चतुर्थपञ्चमषष्ठाङ्केषु अङ्गवीररसस्याभिव्यक्तिः परिलक्ष्यते। तेषु एकमुदाहरणं विविच्य प्रस्तूयते -

**ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-**
**मुद्भूरिघोरघनघर्घरघोषमेतत्।**
**ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-**
**जृम्भाविडम्बिविकटोदरमस्तु चापम्॥** (४.२९)

जिह्वोपमगुणः (चापस्य ज्या) ममेदं धनुः वर्तुलाकारं करोतु, दन्तद्वयवत् अस्याग्रभागौ भीषणौ स्याताम्, तस्माच्च नितरां भयङ्करः टङ्कारनादः प्रभवतु। एवंस्थिते मम एतस्य धनुषः भीषणः अभ्यन्तरभागः प्रलयकाले जगद्ग्रस्यमानस्य यममुखस्य एव विडम्बनां करोतु।

उक्ते श्लोके लवनिष्ठोत्साहभावस्य आलम्बनविभावो भवति यज्ञीयाश्वरक्षायां नियुक्ताः सैनिकाः, तेषां कर्कशवाक्यं शस्त्राणां च विस्फुरणमेव आलम्बनविभावौ। लवस्य वीरत्वसूचकवाक्यानि, अङ्गप्रत्यङ्गास्फालनम्, हास्यादयः शारीरिकाः सात्त्विकाश्च अनुभावाः। व्यभिचारिभावेषु गर्व एव प्रमुखतया उत्साहभावं पोषयति।

## रौद्रः –

अन्यायं, दुष्टकार्यम् आचरन्तं प्रति अस्माकं यः स्वाभाविकक्रोधो सञ्जायते, तस्य कविवर्णितं स्वरूपमेव रौद्ररसस्य निदर्शनम्। भवभूतिः स्वस्य उत्तररामचरितनाटके चतुर्थे पञ्चमे षष्ठे चाङ्के कतिपयनाट्यपात्रोक्त्या रौद्ररसं प्रास्तौत्। तेषु एकमुदाहरणं परीक्ष्यते—

**चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः**

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।**
**धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्रं भ्रुवो-**
**श्चन्द्रस्योद्भटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च॥** (५।३५)

अत्र चन्द्रकेतोः सुमन्त्र इति नामानः सारथिः लवचन्द्रकेत्वोः परस्परं क्रोधविषयं विवर्णयिषति। तेनोक्तं - परस्परं सङ्घर्षे प्रवृत्तयोः उभयोः कम्पितकेशानां ग्रन्थयः शिथिलतां प्राप्ताः। रक्तकमलपत्राणीव स्वाभाविकं रक्तिममनयोः नयनं क्रोधवशादधिकरक्तिमत्वं प्राप्तम्। तयोराननं कलङ्कितचन्द्रस्य भ्रमराकीर्णपद्मस्येव वा शोशुभ्यते।

उक्तश्लोके लवचन्द्रकेत्वोः परस्परक्रोधः आलम्बनविभावः। परस्परमौद्धत्यपूर्णा उक्तिरेव उद्दीपनविभावः। कुशकृतं रामपरशुरामादीनां स्तवनं लवक्रोधमुद्दीपितम्, तेनैव लवेन ते वीरश्रेष्ठाः निन्दिताः, तस्माच्चन्द्रकेतोरपि क्रोधः प्रज्वलितः। भ्रूभङ्गः, केशबन्धनस्य शैथिल्यं गात्रकम्पनं, नयनरक्तिमा चेत्यादीनि अनुभावस्य सूचकानि। उग्रता, आवेगः, उत्साहः, अस्थिरता च ये भावाः अत्र साक्षाद् वर्णनायाः अविषयाः तथापि आक्षेपलभ्याः, त एवात्र व्यभिचारिभावाः।

### बीभत्सः –

घृण्यपदार्थानामरुचिकरपदार्थानां दर्शनात् श्रवणाद्वास्माकं चित्ते जुगुप्सावृत्तिरुदेति। किन्तु यद्येवंविधाः पदार्थाः कविप्रतिभया वाङ्मयमूर्तिम् आप्नुवन्ति, तदा त एव आनन्दजनकाः भवन्ति। एवं तन्माध्यमेन वयं यं रसमास्वदामहे तस्य नाम बीभत्सरस इति। उत्तररामचरिते नाटककर्ता बीभत्सरसास्वादनात् सचेतसः न न्यवारयत्। कतिपये स्थानेऽस्य वर्णनम् अस्ति। यथा वासन्त्या आत्रेय्यै यन्मध्याह्नवर्णनं दत्तम्, तत्रोक्तम् - "**छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः**"[11] इति — छायायां स्थितैः कतिपयैः पक्षिभिः चञ्च्वाघातेन वृक्षत्वचः कीटाः मुखेन निष्कास्यन्ते, पक्षिणामुद्देश्यं कीटानां भक्षणमिति। अत्र आकृष्यमाणाः कीटाः आलम्बनविभावाः; पक्षिभिः तेषां कीटानां भक्षणमुद्दीपनविभावः। नेत्रनिमीलनं, मुखविकृतीत्यादयोऽनुभावाः किञ्चोद्वेगादयश्च व्यभिचारिभावाः आक्षेपलभ्याः।

### भयानकः –

---

[11] उत्तररामचरितम्, २.९

भयस्य परिनिष्ठितकाव्यरूपमध्ये सहृदयाः भयानकरसास्वादं लभन्ते। उत्तररामचरिते द्वित्रेषु स्थलेषु भयानकरसस्य लघ्वी वर्णना दृश्यते। जनस्थानप्रान्तवर्तिनमरण्यं वर्णयितुं शम्बूकः रामं प्रति एवमवोचत् —

**निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः**
**स्वेच्छासुप्तगभीरघोरभुजगश्वासप्रदीप्ताग्नयः।**
**सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं**
**तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते॥** (२.१६)

अस्मिन्नरण्ये कस्याञ्चिद्दिशि निस्तब्धता, निःस्पन्दताऽस्ति, कस्याञ्चिद्दिशि पुनः हिंस्रजन्तूनां भीषणनिनादैः परिसरः मुखरितः, कस्मिंश्चित् स्थाने स्वेच्छया सुप्तानां महतां भुजगानां निश्वासैः वह्निः प्रज्वलति। प्रान्तभागेन विदीर्णे भूमिगह्वरे अल्पं जलमस्ति, तत्रैव तृष्णार्ताः कृकलासाः बृहदाकारयुतानामजगराणां स्वेदद्रवं पिबन्ति। भयङ्करमेतद् अरण्यवातावरणमत्र आलम्बनविभावः। हिंस्रप्राणिनां प्रचण्डनिनादाः, भुजगनिःश्वासैः प्रदीप्ताग्निः इत्यादयः उद्दीपनविभावाः। स्वेदः, रोमाञ्चः, कम्पनमित्यादयः अनुवाभाः। शङ्का, त्रासश्चेत्यादयः व्यभिचारिभावाः आक्षेपलभ्याः।

**हास्यः** –

गम्भीरजीवनदर्शने विश्वासिनः नाटककारभवभूतेः रचनासु हास्यरसः दुर्लभः। न विद्यते किञ्चन विदूषकपात्रम्। समालोचकानामेवंविधमतं सम्पूर्णतः सत्यमिति न। उत्तररामचरितस्य कतिपयस्थानेषु भवभूतिप्रयुक्तहास्यरसः सचेतसानां चित्तमाकर्षयति। नाटके प्रथमाङ्केऽष्टावक्रस्य प्रवेश एव दर्शकानां हास्योद्रेकनिमित्तम्। चतुर्थाङ्कस्य अन्तिमे दृश्यते यत् तपोवनबालकैः लवसकाशाद् आगत्य एकोऽद्भुतप्राणीः वर्ण्यमानोऽस्ति। तस्य नाम अश्वः, किन्तु सः कदापि तैः न दृष्टः। तद्वर्णनमित्थम् —

**पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं**
**दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।**
**शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्**
**किं व्याऽख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः॥** (४.२६)

तस्मिन् प्राणिनि पृष्ठतो लम्बमानं पुच्छं सदा चलति, दीर्घा तस्य ग्रीवा, खुराश्चत्वार एव। यानि मलपिण्डकानि स त्यजति तेषामाकारः आम्रफलसदृशो भवति। अश्वविषये प्रत्यक्षानुभवरहितानां चपलाश्रमबालकानाम् एतद्विचित्रं वर्णनं हास्यकरं भवति। अस्य हास्यरसस्य आलम्बनविभावः अश्वः

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

बालकदत्तमिदं वर्णनमुद्दीपनविभावः। दन्तविकासनेत्रविस्तार इत्यादयः अनुभावाः, आवेगः, चाञ्चल्यमित्यादयो व्यभिचारिभावाः आक्षेपलभ्याः।

**अद्भुतः –**

अलौकिकस्य कस्यचित् द्रव्यस्य दर्शनेन, अचिन्त्यमानस्य कस्यचित् वृत्तान्तस्य श्रवणेन वा अस्माकं चित्ते यद् आकस्मिकानुभूतिः जायते, तद् विस्मय इति कथ्यते। कविप्रतिभया यदा अस्मन्विस्मयबोधो व्यक्तः सन् परमास्वाद्यतामाप्नोति तदा सोऽद्भुतरस इति निगद्यते। साहित्यदर्पणकारेणैकं मतमुल्लिखितं यत् – सर्वेषामपि रसास्वादाने अद्भुतरसस्य आस्वादनं मिश्रितमस्ति - "**सर्वत्राप्यद्भुतो रसः**"[12] इति। भवभूतिः अस्मिन्नाटके इमं रसमनेन श्लोकेन अभिव्यनक्ति। श्लोकस्तावत् –

**मन्थादिव क्षुभ्यति गाङ्गमम्भो**
**व्याप्तञ्च देवर्षिभिरन्तरिक्षम्।**
**आश्चर्यमार्य्या सह देवताभ्यां**
**गङ्गामहीभ्यां सलिलादुदेति॥** (७/१६)

गर्भनाटकान्ते बाल्मीकिना यदनुष्ठानं समायोजितं तदद्भुतरसात्मकमस्ति। तद्वर्णयतः लक्ष्मणस्य गीः इयम्।

गङ्गायाः जलमुत्तालं, मन्थनमिव क्षुभ्यते। देवार्षयः अन्तरिक्षं व्याप्य तिष्ठन्ति। अहो आश्चर्यम्! पूज्या सीतादेवी भागीरथ्या पृथीव्या च सह सलिलादुत्थाय आगच्छति। अस्य अद्भुतरसस्याश्रयः लक्ष्मणः, आलम्बनविभावः सीता, गङ्गाजलस्य औत्ताल्यं, भागीरथिपृथिवीभ्यां सह सीतायाः आविर्भावः उद्दीपनविभावः। अन्ये भावाः आक्षेपलभ्याः। विभावादिसामग्र्या काव्यात्मकमिदं वर्णनं सहृदयचित्ते अद्भुतरसमभिव्यञ्जयति।

**निष्कर्षः –**

भवभूतिः रससिद्धकवीश्वर इति प्रथितम्। यस्य कृतिषु वीरश्रृङ्गारकरुणादीनां चित्रणं प्राप्यते। महावीरचरितं वीररसप्रधाननाटकं वर्तते, मालतीमाधवे श्रृङ्गारस्य मनोहारिणी छटा दृश्यते। उत्तररामचरिते करुणरसस्य मन्दाकिनी प्रवहति। यद्यपि अस्मिन्नाटके प्रधानरसविषये मतवैविध्यमस्ति तथापि सम्यक् विविच्यते चेदयमेव निष्कर्षः आयाति यत् करुण एव प्रधानरसः। यतो हि कारुण्यं

[12] साहित्यदर्पणः, श्रीकृष्णमोहनशर्मा, तृतीयपरिच्छेदः, पृ - १०३

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(3), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

भवभूतिरेव तनुते। अस्य नाटकस्य तृतीयाङ्के **'रामस्य करुणो रसः'**[13] इत्यारभ्य **'एको रसः करुण एव'**[14] इति समाप्यते, अनेन कविः विवक्षति यत् नाटकस्य प्रधानरसः करुण इति।

### सन्दर्भग्रन्थाः –

१. त्रिपाठी, रमाकान्त, *उत्तररामचरितम्,* वाराणसी, चौखम्बा सुरभारती प्रकाशन, 2018
२. चौधरी, सत्यदेव, *काव्यालंकार,* दिल्ली, वासुदेव प्रकाशन, 1965
३. शर्मा, श्रीकृष्णमोहन, *साहित्यदर्पणः,* बनारस सिटी, चोखम्बा संस्कृत सीरिज आफिस, 1947
४. Raghavan, V. *Bhoja's Srngara Prakasa,* Madras: Purnavasu, 1978

[13] उत्तररामचरितम्, ३.१
[14] उत्तररामचरितम्, ३.४७